Reg. No. : ....................................

Name : ..........................................

**FY-810**

**IMPROVEMENT / SUPPLEMENTARY EXAMINATION, OCTOBER 2022**

Part – II

**SANSKRIT**

Maximum : 80 Scores

Time : 2½ Hours

Cool-off time : 15 Minutes

*निर्देशा :*

- 15 निमेषाः समाश्वाससमयः । प्रश्नान् पठितुम् इच्छानुसारं चयितुम्, उत्तराणि क्रमीकर्तुं च अयं समयः उपयोक्तव्यः ।
- प्रश्नस्य निर्देशान् सश्रद्धं पठित्वा अवगत्य च उत्तराणि लेखनीयानि ।
- प्रश्नानाम् अङ्काः तत्र तत्र दत्ताः । उत्तरलेखनाय समयः अङ्काः च परिगणनीयाः ।

*നിർദ്ദേശങ്ങൾ:*

- 15 മിനിറ്റ് സമാശ്വാസ സമയമാണ്. ഈ സമയം ചോദ്യങ്ങൾ വായിക്കുന്നതിനും ഇഷ്ടമുള്ള ചോദ്യങ്ങൾ തിരഞ്ഞെടുക്കുന്നതിനും ഉത്തരങ്ങൾ ആസൂത്രണം ചെയ്യാനും ഉപയോഗിക്കാം.
- ഓരോ ചോദ്യവുമായി ബന്ധപ്പെട്ട നിർദ്ദേശങ്ങൾ ശ്രദ്ധാപൂർവ്വം വായിച്ചു മനസിലാക്കിയ ശേഷം ഉത്തരമെഴുതുക.
- ഓരോ ചോദ്യത്തിനുമുള്ള സ്കോർ അതോടൊപ്പം നൽകിയിരിക്കുന്നു. ഉത്തരമെഴുതുമ്പോൾ സമയവും സ്കോറും പരിഗണിക്കണം.

**1-9 प्रश्नेषु षणां (6) प्रश्नानाम् उत्तराणि कोष्ठकात् चित्वा लिखत । प्रत्येकम् एकःअङ्कः ।**

**1 മുതൽ 9 വരെയുള്ള ചോദ്യങ്ങളിൽ നിന്ന് ആറ് എണ്ണത്തിന് ശരിയുത്തരം ബ്രാക്കറ്റിൽ നിന്നും എടുത്തെഴുതുക. ഓരോ സ്കോർവീതം.**

**(6 × 1 = 6)**

1. पुरा लघ्वी पश्चात् वृद्धिमती – केषां मैत्री ?

   (खलानाम्, सज्जनानाम्, बालानाम्)

2. रामायणस्य कर्ता क: ?

   (भास:, व्यास:, वाल्मीकि:)

3. 'चिन्ताविष्टयाय सीता' इति काव्यस्य संस्कृतानुवादक: क: ?

   (एन्. गोपालपिल्ला, अनन्तशास्त्री, मेलपुत्तूर्)

4. माहेश्वरसूत्राणि कति ?

   (चतुर्दश, एकादश, दश)

5. शरीरायासजननं कर्म _______।

   (श्रवणम्, व्यायाम:, निद्रा)

6. क्षुधादिकृतदु:खनिवारणाय प्रयत्न: केन कार्य: ?

   (मित्रेण, अपरेण, स्वेन)

7. भासनाटकचक्रे कति रूपकाणि सन्ति ?

   (त्रयोदश, अष्ट, नव)

8. कुमारसम्भवस्य कर्ता कः ?

(भारविः, कालिदासः, माघः)

9. स्वामीविवेकानन्दस्य गुरुः कः ?

(श्रीरामकृष्णपरमहंसः, चाणक्यः, वररुचिः)

**10-15 प्रश्नेषु चतुर्णां प्रश्नानाम् उत्तराणि लिखत । प्रत्येकं द्वौ अङ्कौ ।**

**10 മുതൽ 15 വരെയുള്ള ചോദ്യങ്ങളിൽ 4 എണ്ണത്തിന് ഉത്തരമെഴുതുക. രണ്ട് സ്കോർ വീതം.** **(4 × 2 = 8)**

10. प्रदत्तात् श्लोकभागात् सम्बोधनप्रथमापदानि चित्वा लिखत –

इयमस्तु नातिर्मर्मान्तिमा

दिनसाम्राज्यपते! दिवस्वते! ।

11. पेटिकातः उचिताक्षराणि उपयुज्य अर्थपूर्णं पदं पूरयत ।

| | | |
|---|---|---|
| पा | ले | य |

(1) शीतज ________ न ।

(2) आरोग्य ________ लने ।

12. उदाहरणानुसारं सन्धत्त ।

उदा – इति + अत्र = इत्यत्र ।

1. अपि + अयम् = _______।

उदा – गृहात् + नो = गृहान्नो ।

2. शब्दात् + नो = _______।

13. उदाहरणानुसारं पदच्छेदं लिखत ।

उदा - अत्युन्नतम् – अति + उन्नतम् ।

1. इत्युतीर्यते – ________ ।

उदा - बालाश्च – बाला: + च ।

2. मन्दाश्चरितम् - ________ ।

14. पेटिकातः उचितपदमुपयुज्य रिक्तस्थानानि पूरयत ।

| | | |
|---|---|---|
| हेतूत्प्रेक्षा | फलोत्प्रेक्षा | वस्तूत्प्रेक्षा |

(1) अहेतो: हेतुभावेन सम्भावना _________ ।

(2) अफलस्य फलत्वेन सम्भावना _________ ।

15. वृत्तलक्षणं योजयित्वा लिखत ।

| | | |
|---|---|---|
| 1. | उपेन्द्रवज्रा | तभजाजगौ ग: । |
| | | उदीरितं जरौ । |
| 2. | उक्तावसन्ततिलका | जतजास्ततो गौ । |

**16-18 प्रश्नानां प्रत्येकं त्रय: अङ्का: ।**

**16 മുതൽ 18 വരെയുള്ള ചോദ്യങ്ങൾക്ക് മൂന്ന് സ്കോർ വീതം.** **(3 × 3 = 9)**

16. उदाहरणानुसारं वाक्यानि परिवर्तयत ।

| | |
|---|---|
| उदा - वृक्ष: भवति | वृक्षा: भवन्ति । |
| 1. छात्र: पठति | |
| 2. बाल:लिखति | |
| 3. सत्पुरुष: वदति | |

17. पेटिकात: क्त्वान्त-ल्यबन्त-तुमुन्नन्तपदानि चित्वा लिखत ।

| | | | |
|---|---|---|---|
| वारयितुम् | गत्वा | निवृत्य | ददामि । |

18. अध: प्रदत्तं गद्यभागं पठित्वा सूक्ती: उद्धृत्य लिखत ।

पश्चात् गच्छन्तस्ते त्रय: कञ्चन जनपदं प्रापु: । ते सर्वे ग्रामीणै: पृथक् स्वगृहं नीतवन्त: । प्रथम: भोजनार्थं सूत्रिकामलभत । स: "दीर्घसूत्री विनश्यती"ति सूक्तिं विचिन्त्य भोजनमत्यजत् । द्वितीयाय उपूपः दत्त: । "अतिविस्तारविस्तीर्णं तद्भवेन्न चिरायुषम्" इत्युक्त्वा भक्षणं विहाय गत: । तृतीयाय माषवटिकां भोजनाय अयच्छत् । सोऽपि "छिद्रेष्वनर्था: बहुलीभवन्ति" इत्युक्त्वा अनश्नन् गत: ।

**19-24 प्रश्नेषु चतुर्णां प्रश्नानाम् उत्तराणि लिखत । प्रत्येकं चत्वारः अङ्काः ।**

**19 മുതൽ 24 വരെയുള്ള ചോദ്യങ്ങളിൽ 4 എണ്ണത്തിന് ഉത്തരമെഴുതുക. നാല് സ്കോർ വീതം.** **(4 × 4 = 16)**

19. सम्भाषणांशान् पूरयत –

लता – सुप्रभातम् । सुखम् अस्ति वा ?

राधिका – _______ सुखम् ।

भवती कुत्र गच्छति ?

लता – अहं _______ गच्छामि ।

राधिका – आतुरालयं किमर्थं गच्छति ?

आतुरालये _______ अस्ति ।

लता – मातुल: वेगेन स्वस्थ: भवतु इति प्रार्थयामि । धन्यवाद: ।

राधिका – _______।

20. श्लोकं पठित्वा गद्यक्रमं पूरयत ।

नहि देहिनि शोभनं भवे –

च्चरितार्थे सति जीवितं पुन: ।

सुतरां नटने समापिते ।

स च रङ्गाद्विरमेत् कुशीलव: ।।

देहिनि चरितार्थे सति पुन: _______ न हि _______ भवेत् । _______ सुतरां समापिते सति स: _______रङ्गाद्विरमेत् ।

21. संख्यावाचकशब्दानुपयुज्य रिक्तस्थानानि पूरयत ।

| | |
|---|---|
| 1. एकम् | 2. द्वे |
| 3. ________ | 4. चत्वारि |
| 5. ________ | 6. षट् |
| 7. ________ | 8. अष्ट |
| 9. नव | 10. ________ |

22. उचितं श्लोकभागं 'ख' विभागात् योजयित्वा लिखत ।

| क | ख |
|---|---|
| 1. अकृत्वा शत्रुसंहारम्<br>अगत्वाखिल भूश्रियम् । | कुरङ्गमातङ्गपतङ्गमीन–<br>भृङ्गा:नर:पञ्चभिरञ्वित: किम् । |
| 2. शब्दादिभि: पञ्चभिरेव पञ्च<br>पञ्पत्वमापु: स्वगुणेन बद्धा: । | राजाहमितिशब्दान्नो<br>राजा भवितुमर्हति । |
| | क्षुधादिकृतदु:खं तु<br>विना स्वेन न केनचित् । |

23. प्रदत्तयो: नाटकसङ्केतयो: लक्षणं लिखत ।

(1) आत्मगतम् ।

(2) प्रकाशम् ।

24. खण्डिकात: अधोरेखाङ्कितपदानां स्थाने समानार्थकपदानि कोष्ठकात् चित्वा लिखत ।

<u>तत:</u> ते <u>गुरो:</u> अनुज्ञया प्रतिनिवृत्ताश्च । <u>पुस्तकानि</u> <u>गृहीत्वा</u> गच्छन्त: ते ग्रामचतुष्पथं प्राप्य तत्र उपविष्टा: ।

(स्वीकृत्य, अनन्तरम्, आचार्यस्य, ग्रन्था:)

**25 – 28 प्रश्नेषु त्रयाणामुत्तरं लिखत । प्रत्येकं पञ्च अङ्काः ।**

**25 മുതൽ 28 വരെയുള്ള ചോദ്യങ്ങളിൽ ഏതെങ്കിലും മൂന്ന് എണ്ണത്തിന് ഉത്തരമെഴുതുക. 5 സ്കോർ വീതം.** **(3 × 5 = 15)**

25. यथोचितं योजयत –

| क | ख |
|---|---|
| तरव: | धैर्यशालिन: । |
| मैत्री | जन्तु: । |
| प्रारभ्य | वृक्षा: । |
| धीरा: | मित्रता । |
| पशु: | आरभ्य । |

26. गद्यभागं पठित्वा प्रदत्तानां प्रश्नानाम् उत्तराणि लिखत ।

स्वेन कृतस्य कर्मण: फलं स्वेनैव भोक्तव्यं नेतरै: इति भार्यादीनां प्रतिवचनं निशम्य निषाद: नितरां खिन्न:अभवत् । पश्चात्तापविवश: स: प्रत्यागत्य मुने: पादयो: निपत्य क्षमाम् अयाचत । तं राममन्त्रोच्चारणाय संप्रेर्य ते मुनय: अगच्छन् ।

1. स्वेन कृतस्य कर्मण: फलं केन भोक्तव्यम् ?
2. भार्यादीनां प्रतिवचनं निशम्य नितरां खिन्न: अभवत् । क: ?
3. स: प्रत्यागत्य मुने: पादयो: निपत्य _______ अयाचत ।
4. तं राममन्त्रोच्चारणाय संप्रेर्य ते अगच्छन् । ते के ?
5. गद्यभागे 'दु:खित: अभवत्' इत्यर्थे प्रयुक्तं पदं किम् ?

27. माहेश्वरसूत्राणि क्रमीकृत्य लिखत ।

1. एओङ्
2. ऋलृक्
3. ऐऔच्
4. अइउण्
5. हयवरट्

28. अधोदत्तं गद्यभागं मातृभाषया आङ्गलेय भाषया वा अनुवदत ।

प्रायोगिकवेदान्तस्य प्रवाचकत्वेन प्रसिद्धिं लब्धः स्वामिविवेकानन्दः । तस्य बाल्यकालनाम नरेन्द्रः इति । स्वामीविवेकानन्दस्य जन्मदिनं युवजनदिनत्वेन लोके सर्वत्र आघुष्यते ।

विवेकानन्दः श्रीरामकृष्णपरमहंसस्य समीपं गतवान् । सः परमहंसस्य प्रियशिष्यः अभवत् ।

**29-33 प्रश्नेषु त्रयाणां प्रश्नानाम् उत्तरं लिखत । प्रत्येकं षट् अङ्काः ।**

**29 മുതൽ 33 വരെയുള്ള ചോദ്യങ്ങളിൽ ഏതെങ്കിലും മൂന്ന് എണ്ണത്തിന് ഉത്തരമെഴുതുക. 6 സ്കോർ വീതം.**

**(3 × 6 = 18)**

29. 'क' विभागे प्रदत्तमाशयप्रतिपादकं श्लोकं 'ख' विभागात् चित्वा लिखत ।

| 'क' | 'ख' |
|---|---|
| (1) फलवन्तो वृक्षाः नम्राः भवन्ति । अभिवृद्धौ विनयः लोकोपकारिणां स्वभाव एव । | • निन्दन्तु नीतिनिपुणाः यदि वा स्तुवन्तु<br>लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम् ।<br>अद्यैव वा मरणमस्तु युगान्तरे वा<br>न्याय्यात् पथः प्रविचलन्ति पदं न धीराः ।। |
| (2) अरसिको जनः साहित्य-सङ्गीतादिषु अतत्परः पशुवत् भवति । | • भवन्ति नम्रास्तरवः फलागमै-<br>र्नवाम्बुभिर्दूरविलम्बिनो घनाः ।<br>अनुद्धताः सत्पुरुषाः समृद्धिभिः<br>स्वभाव एवैष परोपकारिणाम् ।। |
| (3) नीतिनिपुणाः न्यायाधिष्ठितमार्गात् एकमपि पदं कदापि न प्रविचलन्ति । | • साहित्यसङ्गीतकलाविहीनः<br>साक्षात्पशुः पुच्छविषाणहीनः ।<br>तृणं न खादन्नपि जीवमान-<br>स्तद्भागधेयं परमं पशूनाम् ।। |

30. 'कर्मणैव हि संसिद्धिः' इति पाठभागमधिकृत्य कथास्तम्भान् क्रमीकुरुत ।

1. पथिकानां धनामि अपहृत्य कुटुम्बं पोषयामि ।
2. खड्गं प्रसार्य निषादः तेषां पुरतः आपतत् ।
3. सः प्रत्यवदत् । रत्नाकरो नाम निषादोऽहम् ।
4. 'वत्स कः त्वम् ?' वसिष्ठः तम् उपृच्छत् ।
5. कर्णकठोरं गर्जनं श्रुत्वा सप्तर्षयः चकिताः अभवन् ।
6. 'वत्स' इति सम्बोधनेन तस्य हृदयं अभूतपूर्वाम् अनुभूतिम् अलभत ।

31. इष्टतमं श्लोकं चित्वा सकारणं विशदयत ।

(1) जनयित्रि ! विलोकयाम्यहं
भवतीं मां दधतीं सुवत्सलाम् ।
निजमश्रुभुवं समुज्वला –
मुपयान्तीमनघे ! वसुन्धरे ! ।।

(2) विशिखा ! निशिता विरम्यतां
क्षतमेयात् स्तिमितं न मे मनः ।
पुरतो भ्रम लोकचक्र ! मां
त्यज सीतामिह तां हतामहो ।।

(3) इयमस्तु नातिर्ममान्तिमा
दिनसाम्राज्यपते ! दिवस्वते ! ।
कनकांशुशरौघ धारिणे
भवते दुष्प्रसहप्रदीप्तये ।।

32. श्लोकं पठित्वा प्रश्नानामुत्तराणि लिखत ।

उवाच चैनं परमार्थतो हरं
न वेत्सि नूनं यत एवमात्थ माम् ।
अलोकसामान्यमचिन्त्यहेतुकं
द्विषन्ति मन्दाश्चरितं महात्मनाम् ।।

(1) श्लोके 'अवदत्' इत्यर्थे प्रयुक्तं पदं किम् ?

(उवाच, माम्, नूनम्)

(2) मन्दा: केषां चरितं द्विषन्ति ।

(महात्मनाम्, दुरात्मनाम्, ऋषीणाम्)

(3) सन्धत्त – च + एनम् = _______।

(4) श्लोकस्य आशयं स्ववाक्यै: लिखत ।

33. गद्यभागस्य आशयं संगृह्य लिखत ।

युवयोगी अयं (स्वामी विवेकानन्द:) चिक्कागो नगरे प्रचलिते विश्वधर्मसमारोहे भागमभजत् । तत्र प्रभाषणावसरे 'अमेरिका देशीया: मे स्वसार: भ्रातरश्च' इति सम्बोधनेन जनसहस्राणां मनांसि हठादाकर्षन् अयं भारतीयसंस्कृतेरौन्नत्थं प्राकटयत् । अत एव सभावासिन: अनवरतकरघोषै: तं बह्वमन्यन्त ।

पौरस्त्यतत्त्वसंहिताया: तथा पाश्चात्यप्रौद्योगिकतायाश्च समन्वयं च ऐच्छत् । वेदोपनिषदादिभि: भारतीयदर्शनै: प्रचोदित: स: भारतीयान् कर्मोत्सुकान् कृत्वा राष्ट्रस्य लोकस्य च गौरवोद्दीपनाय निस्तन्द्रम् अयतत ।

शताधिका: तस्य सूक्तय: भगवद्गीताया: कर्मयोगं वारं वारम् उद्घोषयन्ति । कर्मवैमुख्यमपाकर्तुं युवान: दृढचित्ता: भवेयुरिनि इमा: सूक्तय: ज्ञापयन्ति । दिङ्मात्रमुदाह्रियते मानवेषु अन्तलीनाया: पूर्णताया: परिस्फूर्तिरिव शिक्षा । धर्मस्तु तेषु अन्तर्निहितस्य दिव्यत्वस्य द्योतनमेव ।

**34-35 प्रश्नयोः एकस्य उत्तरं लिखत । अष्ट अङ्काः ।**

**34 മുതൽ 35 വരെയുള്ള ചോദ്യങ്ങളിൽ ഏതെങ്കിലും ഒന്നിന് ഉത്തരമെഴുതുക. 8 സ്കോർ.** **(1 × 8 = 8)**

34. प्रदत्तसूचनामनुसृत्य पाणिन्या: जीवितकथां लिखत ।

सूचना:

1. तक्षशिलासर्वकलाशालायां पठनार्थं गतवान् ।
2. सतीर्थ्या: पाणिनिं परिहसन्ति स्म ।
3. बहुप्रयत्नं कृत्वापि फलं न लब्धम् ।
4. कोऽपि मार्ग: न दृष्टम् । तत: गृहमगच्छत् ।
5. मात्रा दाक्ष्यासाकं नदीमगच्छत् ।
6. विद्यालाभार्थं तप: चरितुं निर्णिनोति ।
7. महादेवं प्रत्यक्षीचकार ।
8. माहेश्वरसूत्राणि स्वीकरोति ।

35. समयवाचकशब्दान्युपयुज्य दिनचर्यां पूरयत ।

प्रभाते ______ (4.00) वादने निद्रात: उत्तिष्ठति । शौचाद्यनन्तरं ______ (4.30) वादने प्रार्थयति । व्यायामानन्तरं ______ (5.15) वादने पठति । ______ (7.00) वादने वार्तापत्रिका: पठति । ______ (7.45) वादने प्रभातभक्षणं खादति । ______ (8.15) वादने विद्यालयं गच्छति । पठनादिषु व्यापृत: भवति । सायंकाले ______ (5.00) वादने विद्यालयात् प्रत्यागच्छति । ______ (6.30) वादने प्रार्थयति ।